# पाठ – 12

# कः रक्षति कः रक्षितः

---

**अभ्यासः**

**Q1. प्रश्नानामुत्तराणि एकपदेन लिखत–**

**(क) केन पीडितः वैभवः बहिरागतः?**
**(ख) भवनेत्यादीनां निर्माणाय के कर्त्यन्ते?**
**(ग) मार्गे किं दृष्ट्वा बालाः परस्परं वार्तालाप कुर्वन्ति?**
**(घ) वयं शिक्षिताः अपि कथमाचरामः?**
**(ङ) प्लास्टिकस्य मृत्तिकायां लयाभावात् कस्य कृते महती क्षतिः भवति?**
**(च) अद्य निदाघतापतप्तस्य किं शुष्कतां याति?**

**Answer.** (क) विद्युदभावेन
(ख) वृक्षाः
(ग) अवकरभाण्डारम्
(घ) अशिक्षिता इव
(ङ) पर्यावरणस्य
(च) तालु

**Q2. पूर्णवाक्येन उत्तराणि लिखत–**

**(क) परमिन्दर् गृहात् बहिरागत्य किं पश्यति?**
**(ख) अस्माभिः केषां निर्माणाय वृक्षाः कर्त्यन्ते?**
**(ग) विनयः संगीतामाहूय किं वदति?**
**(घ) रोजलिन् आगत्य किं करोति?**
**(ङ) अन्ते जोसेफः पर्यावरणक्षायै कः उपायः बोधयति?**

**Answer.** (क) परमिन्दर् गृहात् बहिरागत्य पश्यति यत् वायुवेगः तु सर्वथा अवरुद्धः।

(ख) अस्माभिः बहुभूकिमभवनानां भूमिगतमार्गाणां मेट्रोमार्गाणाम् उपरिगमिसेतूनां च निर्माणाय वृक्षाः कर्त्यन्ते।

(ग) विनयः संगीतामाहूय वदति यत्

(घ) रोजलिन् आगत्य बालैः साकं स्वक्षिप्तमवकरं मार्गे विकीर्णमन्यदवकरं चापि संगृह्य अवकरमण्डले पातयति।

(ङ) अन्ते जोसेफः पर्यावरणरक्षायै कथयति यत् तेषां पितृणां शिक्षकाणां च सहयोगेन प्लास्टिकस्य विविधपक्षाः विचारणीयाः । तथा च पर्यावरेण साकं पशवः अपि रक्षणीयाः।

**Q3. रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरुत–**
**(क) जागरूकतया एव स्वच्छताऽभियानमपि गतिं प्राप्स्यति।?**
**(ख) धेनुः शाकफलानामावरणैः सह प्लास्टिकस्यूतमपि खादति स्म?**
**(ग) वायुवेगः सर्वथाऽवरुद्धः आसीत्?**
**(घ) सर्वे अवकरं संगृह्य अवकरकण्डोले पातयन्ति?**
**(ङ) अधुना प्लास्टिकनिर्मितानि वस्तूनि प्रायः प्राप्यन्ते?**
**(च) सर्वे नदीतीरं प्राप्ताः प्रसन्नाः भवति?**

**Answer.** (क) केन प्रकारेण एव स्वच्छताभियानमपि गतिं प्राप्स्यति?

(ख) धेनुः केन सह प्लास्टिकस्यूतमपि खादति स्म।

(ग) किं सर्वथावरुद्धः आसीत्?

(घ) सर्वे अवकरं संगृह्य कुत्र पातयन्ति?

(ङ) अधुना प्लास्टिकनिर्मितानि किं प्रायः प्राप्यन्ते?

(च) सर्वे किं प्राप्ताः प्रसन्नाः भवन्ति?

**Q4. सन्धिविच्छेदं पूरयत–**

**(क) ग्रीष्मर्तौ – ......................... + ऋतौ**
**(ख) बहिरागत्य – बहिः + .........................**
**(ग) काञ्चित् – ......................... + चित्**
**(घ) तद्वनम् – ......................... + वनम्**
**(ङ) कलमेत्यादीनि – ......................... + आनन्दप्रदः + ......................**
**(च) अतीवानन्दप्रदोऽयम् – .........................**

**Answer.** (क) ग्रीष्मर्तौ = ग्रीष्म + ऋतौ

(ख) बहिरागत्य = बहिः + आगत्य

(ग) काञ्चित् = काम् + चित्

(घ) तद्वनम् = तत् + वनम् / तद् + वनम्

(ङ) कलमेत्यादीनि - कलम + इति + आदीनि

(च) अतीवानन्दप्रदोऽयम् - अतीव + आनन्दप्रदः + अयम्

**Q5. विशेषणपदैः सह विशेष्यपदानि योजयत–**

| | |
|---|---|
| काञ्चित् | अवकरम् |
| स्वच्छानि | स्वास्थ्यकरी |
| पिहिते | क्षतिः |
| स्वच्छता | शान्तिम् |
| गच्छन्ति | गृहाणि |
| अन्यत् | अवकरकण्डोले |
| महती | मित्राणि |

**Answer.**

| | |
|---|---|
| काञ्चित् | शान्तिम् |
| स्वच्छानि | गृहाणि |
| पिहिते | अवकरमण्डले |
| स्वच्छता | स्वास्थ्यकरी |
| गच्छन्ति | मित्राणि |
| अन्यत् | अवकरम् |
| महती | क्षतिः |

**Q6. शुद्धकथनानां समक्षम् आम् अशुद्धकथनानां समक्षं च न इति लिखत–**

**(क) प्रचण्डोष्मणा पीडिताः बालाः सायंकाले एकैकं कृत्वा गृहाभ्यन्तरं गताः।**

**(ख) मार्गे मित्राणि अवकरभाण्डारं यत्र–तत्र विकीर्णं दृष्ट्वा वार्तालापं कुर्वन्ति।**

**(ग) अस्माभिः पर्यावरणस्वच्छतां प्रति प्रायः ध्यानं न दीयते।**

**(घ) वायुं विना क्षणमपि जीवितुं न शक्यते।**

**(ङ) रोजलिन् अवकरम् इतस्ततः प्रक्षेपणात् अवरोधयति बालकान्।**

**(च) एकेन शुष्कवृक्षेण दह्यमानेन वनं सुपुत्रेण कुलमिव दह्यते।**
**(छ) बालकाः धेनुं कदलीफलानि भोजयन्ति।**
**(ज) नदीजले निमज्जिताः बालाः प्रसन्नाः भवन्ति।**

**Answer.** (क) न (ख) आम् (ग) आम् (घ) आम् (ङ) न (च) न (छ) आम् (ज) आम्

**Q7. घटनाक्रमामनुसारं लिखत–**

**(क) उपरितः अवकरं क्षेप्तुम् उद्यतां रोजलिन् बालाः प्रबोधयन्ति।**

**(ख) प्लास्टिकस्य विविधापक्षान् विचारयितुं पर्यावरणसंरक्षेणन पशूनेत्यादीन् रक्षितुं बालाः कृतनिश्चयाः भवन्ति।**

**(ग) गृहे प्रचण्डोष्मणा पीडितानि मित्राणि एकैकं कृत्वा गृहात् बहिरागच्छन्ति।**

**(घ) अन्ते बालाः जलविहारं कृत्वा प्रसीदन्ति।**

**(ङ) शाकफलानामावरणैः सह प्लास्टिकस्यूतमपि खादन्तीं धेनुं बालकाः कदलीफलानि भोजयन्ति।**

**(च) वृक्षाणां निरन्तरं कर्तनेन, ऊष्मावर्धनेन च दुःखिताः बालाः नदीतीरं गन्तुं प्रवृत्ताः भवन्ति।**

**(छ) बालैः सह रोजलिन् अपि मार्गे विकीर्णमवकरं यथास्थानं प्रक्षिपति।**

**(ज) मार्गे यत्र–तत्र विकीर्णमवकरं दृष्ट्वा पर्यावरणविषये चिन्तिताः बालाः परस्परं विचारयन्ति।**

**Answer.** (ग) गृहे प्रचण्डोष्मणा पीडितानि मित्राणि एकैकं कृत्वा गृहात् बहिरागच्छन्ति।

(च) वृक्षाणां निरन्तरं कर्तनेन, ऊष्मावर्धनेन च दुःखिताः बालाः नदीतीरं गन्तुं प्रवृत्ताः भवन्ति।

(ज) मार्गे यत्र-तत्र विकीर्णमवकरं दृष्ट्वा पर्यावरणविषये चिन्तिताः बालाः परस्मरं विचारयन्ति।

(क) उपरितः अवकरं क्षेतुम् उद्यतां रोजलिन् बालाः प्रबोधयन्ति।

(छ) बालैः सह रोजलिन् अपि मार्गे विकीर्णमवकरं यथास्थानं प्रक्षिपति।

(ङ) शाकफलानामावरणैः सह प्लास्टिकस्यूतमपि खादन्तीं धेनुं बालकाः कदलीफलानि भोजयन्ति।

(ख) प्लास्टिकस्य विविधापक्षान् विचारयितुं पर्यावरणसंरक्षणेन पशूनपि रक्षितुं बालाः कृतनिश्चयाः भवन्ति।